# શ્રી ધર્મપુરી લક્ષ્મી નરસિંહગીતિકાઃ

Shri Dharmapuri Lakshminarasimha gitika

sanskritdocuments.org

February 24, 2018

# Shri Dharmapuri Lakshminarasimha gitika

# શ્રી ધર્મપુરી લક્ષ્મી નરસિંહગીતિકાઃ

## Sanskrit Document Information


Text title : dharmapurIlakShmInarasiMhagItikAH

File name : dharmapurIlakShmInarasiMhagItikAH.itx

Category : vishhnu, koriDevishvanAthasharmA, suprabhAta, devii

Location : doc_vishhnu

Author : koriDe vishvanAthasharmA, dharmapurI

Transliterated by : koriDe vishvanAthasharmA

Proofread by : koriDe vishvanAthasharmA

Acknowledge-Permission: Koride Vishwanatha Sharma

Latest update : February 24, 2018

Send corrections to : Sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**



February 24, 2018

*sanskritdocuments.org*

# શ્રી ધર્મપુરી લક્ષ્મી નરસિંહગીતિકાઃ

ॐ ગઁ ગણપતયે નમઃ ॥

હરિનરાકૃતિં સૈંહિકાનનં
    જલધિપુત્રિકા સેવિતાઙ્ઘ્રિકમ્ ।
ભરણભૂષિતં ભૂષિત પ્રભમ્
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૧॥

હરિવરાનનં ધાતુકાન્તકં
    શ્રિતજયપ્રદં ચક્રધારિણમ્ ।
ભુજગશાયિનં ભૂરિદાયિનં
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૨॥

ઋષિવરાશ્રિતં ઋગ્ભિરર્ચિતં
    વિદિતવેદ્યકં વેદગમ્યકમ્ ।
શ્રિતવરાર્થિને કલ્પવૃક્ષકં
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૩॥

દિતિજબાલકપ્રાણરક્ષણે
    દિતિજમન્દિરે સ્તમ્ભસમ્ભવમ્ ।
દ્વિજબુધૈઃ સદા પૂજિતં સ્તવૈઃ
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૪॥

સુજનભક્તકાન્ સક્તરક્ષકં
    કુજનશિક્ષણે સક્તચિત્તકમ્ ।
મકરમૌખિકાત્ નાગરક્ષકં
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૫॥

સુરપતેઃ સુખાત્સગ્ચયાદ્યગાં
    મુનિસતીં વરાં પાદુકોદ્ધૃતમ્ ।

નિરતભાવિનાં પાપનાશકં
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૬॥

વિહિતપાપધિં કાલકાલગં
    હરિરિતીરિતં નિર્મલહ્રુરમ્ ।
યદિયમુચ્ચતેઽજામિળાદિના
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૭॥

નિગમરક્ષણે મત્સ્યકાયિનં
    અમૃતસાધને કૂર્મવેષિનમ્ ।
અવનિપાલને શ્રીવરાહકં
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૮॥

દનુજમારણે સૈંહિકાનનં
    બલિવિમર્દને વામનાકૃતિમ્ ।
કુપતિભઞ્જને ભાર્ગવદ્વિજં
    નરહરિં ભજે ધર્મપૂર્વિભુમ્ ॥ ૯॥

રઘુકુલોદ્ભવં રાવણાન્તકં
    દ્રુપદજાવને કૃષ્ણરૂપિણમ્ ।
શમનસાધને બુદ્ધરૂપિણં
    નરહરિં ભજેધર્મપૂર્વિભુમ્ ॥ ૧૦॥

કલિવિમર્દને કલ્કિદેહિનં
    અભયરૂપિણં આશ્રિતાશ્રયમ્ ।
નતમુખોઽસ્મ્યહં નૈકધાકૃતિં
    નરહરિં ભજેધર્મપૂર્વિભુમ્ ॥ ૧૧॥

Composed by Koride Vishwanatha Sharma, Dharmapuri, Telangana
Proofread by Koride Vishwanatha Sharma.

*Shri Dharmapuri Lakshminarasimha gitika*
pdf was typeset on February 24, 2018

Please send corrections to *sanskrit@cheerful.com*